Roll No. .......................... Total Pages : 03

# LMDE/M-24 7079

## KAVYAM KAVYASHASTRAM CHA

## SKT-HC-204

Time : Three Hours] [Maximum Marks : 80

**नोट** : सर्वे प्रश्नाः समाधेयाः । **द्वितीय** प्रश्नः संस्कृतेन साधनीयः ।

### इकाई I

**1.** अधोलिखिताः प्रश्नाः संक्षिप्तोत्तरैः समाधेयाः – **4×4=16**

(क) बाणभट्टस्य रचनावैशिष्ट्यं संक्षेपेण विवेचयत ।

(ख) कालिदासस्य मेघदूतवैशिष्ट्यं संक्षेपेण विवेचयत ।

(ग) विश्वनाथकृतं काव्यप्रयोजनं लिखत ।

(घ) वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः ।

**2.** काव्यसौष्ठवनिर्देशपुरस्सरं सप्रसङ्गं गद्यांश**द्वयं** व्याख्येयम् – **2×8=16**

(क) मया मृगमायां यदृच्छया निरर्थकमनुबध्नता तुरङ्गमुखमिथनम्, अयमतिमनोहरो मानवानामगम्यो दिव्यजनसञ्चरणोचितः प्रदेशो वीक्षितः। अत्र च सलिलमन्वेषमाणेन हृदयहारि सिद्धजनोपस्पृष्टजलं सरो दृष्टम् । तत्तीरलेखाविश्रान्तेन चामानुषं गीतमाकर्णितम् । तच्चानुसरता मानुषदुर्लभमदर्शना दिव्यकन्यकेयमालोकिता ।

(ख) आर्य्यामिव समुपात्तयतिगणोचितमात्राम्, अलिखितामिवाचलावस्थानाम्, अंशुमयीमिव तच्छायानुलिप्तभूतलाम् निर्म्ममाम्, निरहङ्काराम्, निर्म्मत्सराम्, अमानुषाकृतिम्, दिव्यत्वादपरिज्ञायमान–वयः परिमाणाम्, अप्यष्टदश–वर्षदेशीयामिवोपलक्ष्यमाणाम्, प्रतिपन्नपाशुपतव्रतां कन्यकां ददर्श ।

(ग) अलमलमतियन्त्रणया, कृतमतिप्रसादेन, भगवति ! प्रसीद, विमुच्यतामयमत्यादरः, त्वदीयमालोकनमपि सर्वपाप प्रशमनमद्यमर्षणमिव पवित्रीकरणायालम्, आस्यताम् इत्यब्रवीत् । अनुरुध्यमानश्च तया तां सर्वामतिथिसपर्य्यामतिदूरावनतेन शिरसा समश्रयं प्रतिजग्राह ।

**3.** काव्यसौष्ठवनिर्देशपूर्वकं सप्रसङ्गं श्लोक**द्वयं** व्याख्यायताम् **: 2×8=16**

(क) तस्याः किञ्चित्करधृतमित्त्व प्राप्तवानीरशाखं
हृत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम् ।
प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि
ज्ञातास्वादो विवृतजघनां को विहातु समर्थः ॥

(ख) हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां
बन्धुप्रीत्या समरविमुखो लाङ्गली या सिषेवे ।
कृत्वा प्रासामधिगममपां सौम्य सारस्वतीनाम्
अन्तः शुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः ॥

(ग) ये संरम्भोत्पतनरभसाः स्वाङ्गभङ्गाय तस्मि-
न्मुक्ताध्वानं सपदि शरभा लङ्घयेयुर्भवन्तम् ।
तान्कुर्वीथास्तुमुलकरकावृष्टि पातावकीर्णान्
के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः ॥

**4.** **द्वयोरेकः** प्रश्नः साधनीयः – **16**

विश्वनाथस्य काव्यलक्षणं अन्याचार्याणां च खण्डनं सोदाहरणं साहित्यदर्पणानुसारं निरूपयत ।

**अथवा**

विश्वनाथकृतं 'अभिधाशब्दशक्तेः' सोदाहरणं व्याख्याताम् ।



**5.** **द्वयोरेकः** प्रश्नः विवेचनीयः – **16**

व्यञ्जनाशब्दशक्तेः लक्षणं विलख्य संयोग विप्रयोगादीन् सोदाहरणं लिखत ।

**अथवा**

वाच्योऽर्थोऽभिधयाा बोध्यो लक्ष्यो लक्षणया मतः ।
व्यङ्गयो व्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः ॥
सोदाहरणं विवेचयत ।